दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-240 | 1 | जून 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लाष्टमी
आषाढः 08 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशविश्वविद्यालये पूरयिष्यन्ते शिक्षकाणां अशिक्षकाणां च २३० पदानि, राज्यसर्वकाराय प्रेषितं प्रकरणम्

3 धर्मक्षेत्रे कुरुक्षेत्रे संस्कृतभारत्याः दशदिवसीय-आवासीय-प्रबोधनवर्गस्य शुभारम्भः, १८० शिक्षार्थिनः प्रशिक्षणं गृह्णन्ति

6 नाभानगरे विद्याभारत्याः दयानन्दपब्लिकविद्यालये जातः संस्कृतभारत्याः सम्पूर्तिकार्यक्रमः

## योगः 'मानसिक-स्वास्थ्यात् शारीरिक-स्वास्थ्यं' प्रति एकमात्रो मार्गो विद्यते सहैव मानवीय चेतनायाः प्रकटीकरणम् अस्ति योगः



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी अन्ताराष्ट्रिय-योग-दिवसोपलक्ष्य प्रत्यपादीत् यत् मानसिक स्वास्थ्यात् शारीरिक स्वास्थ्यं प्रति योगः एव एकमात्रो मार्गो विद्यत प्रधानमन्त्रिणः नतृत्व कीलकता नगरस्य 'रह रोड' स्थल मुख्यायोजनं सञ्जातम्, यत्र तरी सहस्रशः साधकैः सह 'सामान्य-योग-नियमानुसारं योगाभ्यासः कृतः। अस्य वर्षस्य मुख्यविषय स्वस्थ वृद्धावस्थायै योगः इत्याख्य विषय जीवन् प्रधानमन्त्री सबलं निर्दिष्टवान् यत् योगः कलिं शारीरिकव्यायामो नास्ति, न च कश्चित् आयुवर्गं प्रति सीमितः, अपितु अयं मानवीय चर्तनायाः प्रकटीकरणम् अस्ति। अवधेयं च यत् देशस्य अन्यभागेषु योगोत्सवः सोल्लासम् आचरितः। राष्ट्रपतिः द्रौपदीमुर्मुः मध्यप्रदेशस्थे जबलपुर-नगरस्य 'गैरीसन ग्राउण्ड' स्थले योगाभ्यासं कृतवती। तया प्रतिपादितं यत् योगः भारतस्य परम्परायाः उत्सवः अस्ति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः लद्दाखस्य लई नगरे 'स्पितुक क्रीडाङ्गणे योगं कुर्वन् न्यगादीत् यत् योगः जीवन स्वास्थ्यस्य चरित्रस्य च कृते दीर्घकालीननिवेशी वर्तते। लोकसभाध्यक्षः ओम् बिड़ला देहल्यां संसद्भवनपरिसरे सामूहिक योगाभ्यासे भागं गृहीतवान्। रक्षामन्त्री राजनाथसिंहः मेघालयस्य शिलाङ्ग-नगरे 'पूर्वी वायु कमान' मुख्यालयस्य आयोजने सम्मिलितो भूत्वा सर्वान् योगं दिनचर्यायाः भागं कर्तुम् आह्वानं कृतवान्। महाराष्ट्र-पञ्जाब-त्रिपुराराज्य सोत्साहं सोल्लासं अन्ताराष्ट्रिय-योग-दिवसः आचरितः। महाराष्ट्रस्य राज्यपालः जिष्णुदविवर्मा 'लोकभवन आरतीय तटरक्षकबलस्य वरिष्ठाधिकारीभिः सह योगाभ्यासं कृतवान्, मुख्यमन्त्री देवेन्द्रडणवीसः 'जुहू समुद्रतटे राज्यस्तरीय कार्यक्रमस्य नतृत्वं विहितवान्। पञ्जाब सीमासुरक्षाबलेन अत्तारी-वाघा, कर्तारपुरसाहिब-कॉरिडोर, हुसैनीवाला अथ सादकी इत्यादिषु प्रमुखस्थानेषु योग-सत्राणि आयोजितानि। अस्मिन्नेव क्रमे भाजपादलस्य राष्ट्रीयाध्यक्षः नितिन नबीनः जलन्धर-समीपस्थ 'लवली प्रोफेशनल यूनिवर्सिटी परिसरे योग-सत्रे सिम्मिलितः अभवत्।त्रिपुरायां राज्यस्य सर्वेषु मण्डलेषु सामूहिकयोगसत्राणि संचालितानि। अगरतलानगरे आयोजिते राज्यस्तरीय कार्यक्रमे मुख्यमन्त्री डॉ. माणिक साहा मानसिक स्वास्थ्याय, एकाग्रतायै अथ निरोग-जीवनाय योगस्य महत्त्वं प्रख्यापितवान्।

## सुभाषितम्

**एक एव सुहृद्धर्मो,**
**निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं,**
**सर्वमन्यत्तु गच्छति॥**

अर्थात्- अर्थात्- एक धर्म ही मित्र है जो मरने पर भी साथ जाता है, अन्य सब वस्तु शरीर के साथ ही नष्ट हो जाती हैं।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## ईरान-अमरिकादशयोः मध्ये उच्चस्तरीयोपवशनम् समारब्धम्



स्विट्जरलैण्डस्य बर्गेन्स्टॉक इति रमणीयनगरे ईरान-अमरिकादशयोः मध्ये उच्चस्तरीयोपवशनम् समारब्धम्। अमेरिकी-प्रतिनिधिमण्डलस्य नेतृत्वं उपराष्ट्रपतिः जेडी. वन्स सहैव ईरानी-प्रतिनिधिमण्डलस्य नतृत्वं संसदः अध्यक्षः मोहम्मद बागर गालिबाफ कुरुतः। उभयोः दशयोः प्रतिनिधी मध्यस्थ-दशाभ्यां पाकिस्तान-कतार-भ्यां सह तत्र सम्प्राप्तौ स्तः। इत्यन्तराले ईरान-दशेन हॉर्मुज जलसन्धिः अवरुद्धा कृता अस्ति। प्राप्तवार्तानुसारं, ईरानस्य 'इवोल्यूशनरी गार्ड नौसेना अग्रिम-सूचना पर्यन्तं जलपोतानां गमनागमनाय अनुमतिपत्रं न यच्छति। इतः प्राक्, ईरानस्य विदेशमन्त्री अब्बास अराघची स्विट्जरलैण्ड-देशस्य विदशमन्त्रिणा इग्नासियो कैसिस-महोदयेन सह बर्गेन्स्टॉक-नगरे मिलितवान्।

## प्रधानमन्त्रिणा कोलकता-नगरे स्वदेशे निर्मितानि त्रीणि भारतीय नौसेना-मञ्चानि राष्ट्राय समर्पितानि; तेनोदीरितं यत् देशे रक्षा-उत्पादन क्षमतायाः वर्धनाय विशेषाः प्रयासाः विधीयन्ते



प्रधानमन्त्रिणा नरद्रमोदिना कोलकातायां स्वदशे निर्मितानां त्रयाणां भारतीय नौसेना-मञ्चानां आई. एन्. एस्. दुनागिरि, आई. एन्. एस्. संशोधकः, आई. एन्. एस्. अग्रयश्च राष्ट्राय समर्पिताः। नौसत्रायाः वारशिप्-डिजाईन्-ब्यूरो इत्यनेन परिकल्पितं तथा गार्डन्-रीच्-शिपबिल्डर्स-एण्ड्-इन्जिनीयर्स इत्यनेन निर्मितं, एताः नौकाः युद्ध-कार्याणि, जल-ग्राफिक्-सर्वेक्षणं, जलनिमग्ननौका-विरोधी-युद्धं च सुदृढं कर्तुं अभिप्रेताः सन्ति। ट्राई कमिशन समीति त्रयायोग-समारोहं सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत् अद्य भारतं स्वस्य सम्पूर्ण समुद्रीय पर्यावरणव्यवस्थां सुदृढं कुर्वत् अस्ति तथा च सागरमाला इत्यादयः उपक्रमाः अस्याः विशालपरिकल्पनायाः भागाः सन्ति। एकः कालः आसीत् यदा भारतं विश्वस्य बृहत्तम रक्षा आयातकेषु अन्यतमम् आसीत्, परञ्च अद्य भारतस्य रक्षा-उत्पादनं द्रुतगत्या वर्धितम् अस्ति, अस्माकं रक्षा-निर्यातः अपि अभूतपूर्वगत्या वर्धमानः अस्ति। रक्षामंत्री राजनाथसिंहः अवदत् यत्, स्वदेशीरूपेण निर्मितानां त्रयाणां भारतीय नौसेना-मञ्चानां त्रि-आयोगः भारतस्य समुद्रीय-क्षमता-विकासस्य निर्णायकं क्षणम् अस्ति।

## महिला हॉकी-क्रीडायाम्, 'एफ़.आई.एच्. महिला नेशन्स कप' स्पर्धायाः चरमे द्वन्द्वे भारतेन न्यूज़ीलैण्ड-दलं द्वे-शून्यं इत्यंकान्तरालेन पराभूतम्

महिला हॉकी-क्रीडायाम्, ऑकलैण्ड-नगरे आयोजितायाम् 'एफ़. आई.एच्. महिला नेशन्स कप' स्पर्धायाः चरम द्वन्द्वे भारतेन न्यूज़ीलैण्ड-दलं द्वे-शून्यं इति अंकैः पराभूय विजेतृ-पदकम् अवाप्तम्। विजयेनानेन भारतीयदलेन एफ. आई.एच्. महिला प्रो-लीग' मध्ये स्थानं सुरक्षितम्।




## भारते विदेशेषु च पञ्चसहस्राधिकेषु परीक्षाकेन्द्रेषु सुदृढ सुरक्षा-व्यवस्थायाः अन्तः नीट-यूजी इत्यस्य पुनःपरीक्षा सुसम्पन्ना

षड्विंशत्यधिक द्विसहस्रतमवर्षस्य नीट. यू. जी. पुनः परीक्षा सम्पूर्ण देने कठोरसुरक्षायाम् आयोजिता, यत्र भारतस्य एकपञ्चाशदधिक-पञ्चशत-नगरे चतुर्दश वैदेशीय नगरे च पञ्चसहस्राधिकेक द्वाविंशति-लक्षतोप्यधिकाः परीक्षार्थिनः परीक्षायां सम्मिलिताः। राष्ट्रिय परीक्षा-संस्थया उक्तं यत् परीक्षा आङ्ग्लभाषायां, द्वादश भारतीयभाषासु च आयोजिता आसीत्, यत्र छात्रानुकूल-सुविधाः यथा पेयजलम्, ओ. आर्. एस्., एम्बुलेंस-यानानि, केन्द्रेषु मातापितृभ्यः छायायुक्त-प्रतीक्षाक्षेत्राणि च स्थापितानि आसन्।

# हिमाचलप्रदेशविश्वविद्यालये पूरयिष्यन्ते शिक्षकाणां अशिक्षकाणां च २३० पदानि, राज्यसर्वकाराय प्रेषितं प्रकरणम्




**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशविश्वविद्यालये (एच.पी.यू.) दीर्घकालात् रिक्तानि चलन्ति शिक्षकाणां तथा च अशिक्षककर्मचारिणां २३० पदानि पूरयितुं प्रक्रिया आरब्धा। विश्वविद्यालयस्तरे रिक्तीनां सूची सज्जीभूता भूत्वा प्रकरणम् अधुना सर्वकारस्य पार्श्वे प्राप्तम्। एतेषु २३० पदेषु ८० शिक्षकाणां पदानि तथा च प्रायः १५० अशिक्षककर्मचारिणां पदानि सम्मिलितानि सन्ति। एतेषु विभिन्नानां शैक्षणिकविभागानां सहैव प्रशासनिक-तकनीकी-संवर्गाणां पदानि अपि अन्तर्भवन्ति। विशेषरूपेण 'जे.ओ.ए. आई.टी.' (JOA IT) सदृशानि तकनीकी-पदानि दीर्घकालात् रिक्तानि सन्ति, येन कार्यालयीये कार्यकलापे साक्षात् प्रभावः दृश्यते। कर्मचारिणां न्यूनतायाः कारणात् बहुषु विभागेषु कार्यस्य भारः निरन्तरं वर्धते। शिक्षकाणाम् अभावेन यत्र कक्षासु, मूल्याङ्कने, शोधकार्येषु च प्रभावः जायमानः अस्ति, तत्रैव अशिक्षककर्मचारिणाम् अभावेन प्रशासनिककार्याणां गतिः मन्दीभूता। बहुषु शाखासु एकस्मिन् एव कर्मचारिणि अतिरिक्त-दायित्वस्य भारः वर्धितः। कुलपतिः प्रो. महावीरसिंहः ज्ञापितवान् यत् रिक्तपदानि पूरयितुं प्रक्रियां प्रति आवश्यकाः औपचारिकताः पूरिताः सन्ति, अग्रे च सर्वकारस्तरे प्रक्रमः करणीयः अस्ति। सर्वकारस्य अनुमतेः परं नियुक्तिप्रक्रिया (भर्ती) चरणबद्धरूपेण अग्रे नेष्यते। विश्वविद्यालयप्रशासनेन अपि सज्जता आरब्धा, येन अनुमतिप्राप्त्यनन्तरमेव चयनप्रक्रिया आरब्धुं शक्येत। एच.पी.यू.-प्रशासनस्य मतम् अस्ति यत् एताभिः नियुक्तिभिः दीर्घकालात् उत्पन्ना कर्मचारिणां न्यूनता बहुशः दूरा भविष्यति, विश्वविद्यालयस्य शैक्षणिक-प्रशासनिक-कार्याणां च गतिं प्राप्तुं आशा वर्तते।

# योगदिवसे स्वस्थजीवनस्य सन्देशः, राज्यपालेन शिमलायां मुख्यमन्त्रिणा च हमीरपुरे कृतः योगाभ्यासः



**हिमसंस्कृतवार्ताः — शिमला ।**अन्ताराष्ट्रिय-योगदिवसस्य अवसरे रविवासरे हिमाचलप्रदेशस्य सर्वेषु मण्डलेषु महता उत्साहेन सह योगाभ्यासः कृतः। प्रदेशस्तरीयकार्यक्रमेषु राज्यपालः शिवप्रतापशुक्लः शिमलायां तथा च मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः हमीरपुरे भागं गृहीत्वा प्रदेशवासिभ्यः योगं अङ्गीकर्तुं सन्देशं दत्तवन्तौ। योगदिवसस्य उपलक्ष्ये सम्पूर्णराज्ये मण्डल-उपमण्डल-पञ्चायतस्तरपर्यन्तं विशेषाः कार्यक्रमाः आयोजिताः। प्रातःकाले विभिन्नेषु स्थानेषु जनैः सामूहिकं योगाभ्यासम् आचर्य स्वस्थजीवनशैल्याः अङ्गीकरणाय सङ्कल्पः गृहीतः। ग्रामीणक्षेत्रेषु अपि पञ्चायतस्तरे बृहत्सङ्ख्यया जनाः योगकार्यक्रमेषु सहभागितां निरूढवन्तः। शिमलायाः ऐतिहासिके 'रिज' (RIDGE) स्थले आयोजिते कार्यक्रमे प्रतिपक्षनेता जयरामठाकुरः अपि राज्यपालेन सह परिवारेण साकं योगाभ्यासम् अकरोत्। तत्रैव सम्पूर्णप्रदेशे योगदिवसं प्रति जनबाहुल्ये विशेषः उत्साहः दृष्टः। सामाजिक-माध्यमेषु (सोशल मीडिया) अपि जनैः योगं कुर्वद्भिः स्वकीयानि चित्राणि चलच्चित्राणि (वीडियो) च साङ्गीकृत्य योगं प्रति जागरूकतायाः सन्देशः प्रसारितः। अस्मिन् अवसरे वक्तृभिः योगः स्वस्थजीवनस्य आधारः इति प्रख्याप्य यूनां सामान्यजनानां च मादकद्रव्येभ्यः (नशे से) दूरं स्थातुं नियमितयोगं च स्वदैनिकचर्यायां समाविष्टं कर्तुम् आह्वानं कृतम्।

# क्रीडकेभ्यः प्रदीयन्ते उत्तमाः सुविधाः, अस्मिन्नेव वर्षे भविष्यति नादौन-इण्डोर-क्रीडाङ्गणस्य शुभारम्भः - मुख्यमन्त्री



**हिमसंस्कृतवार्ताः — हमीरपुरम्।** मुख्यमन्त्री ठाकुर-सुखविन्द्र-सिंह-सुक्खूः हमीरपुरमण्डलस्य अणौ स्थितस्य 'साई' (SAI) संस्थायाः 'सेन्टर ऑफ एक्सीलेंस' इत्यस्य प्रशिक्षुभिः, युवाक्रीडकैः अन्यैः बालैः च सह संवादं विहितवान्। अस्मिन् अवसरे सः अवदत् यत् राज्यसर्वकारः प्रतिभावद्भ्यः क्रीडकेभ्यः विश्वस्तरीयसुविधाः (वर्ल्ड क्लास) उपलापयितुं दृढसङ्कल्पः अस्ति। अस्यामेव शृङ्खलायां नादौन-क्षेत्रे प्रायः १२५ कोटिरूप्यकाणां व्ययेन अत्याधुनिकं 'इण्डोर' क्रीडाङ्गणं (स्टेडियम) निर्माणाधीनं वर्तते, यत् अस्मिन्नेव वर्षे प्रदेशस्य क्रीडकेभ्यः समर्पितं करिष्यते। अस्मिन् सन्तरण (तैराकी)-बैडमिण्टन-वॉलीबॉल-टेनिस-इत्यादिभिः सह १४ क्रीडानां कृते विश्वस्तरीयाः सुविधाः उपलप्स्यन्ते।

राज्यस्तरीय-योगदिवससमारोहे योगाभ्याससत्रे च भागग्रहणात् परं क्रीडकैः सह सम्भाषणकाले मुख्यमन्त्रिणा कथितं यत् राज्यसर्वकारेण अन्तर्राष्ट्रियप्रतियोगितानां पदकविजेतृभ्यः कोटिशः रूप्यकाणां पुरस्कारराशेः प्रावधानं कृतम् अस्ति। एशियन-क्रीडानां (एशियन गेम्स) स्वर्णपदकविजेतृभ्यः ३ कोटिरूप्यकाणि, रजतपदकविजेतृभ्यः २ कोटिरूप्यकाणि तथा च कांस्यपदकविजेतृभ्यः सार्ध-एककोटि (१.५ कोटि) रूप्यकाणि यावत् नगदपुरस्काराः निर्धारिताः सन्ति। एवमेव ओलम्पिक-अन्यान्तर्राष्ट्रियप्रतियोगितासु अपि प्रशंसनीयं प्रदर्शनं कुर्वद्भ्यः क्रीडकेभ्यः कोटिशः रूप्यकाणां पुरस्काराः दीयन्ते।

सः अवदत् यत् सार्ध-त्रिवर्षेभ्यः पूर्वं राज्यसर्वकारेण कार्यभारग्रहणसमनन्तरमेव क्रीडकानां भोजनधने (डाइट मनी) बहुगुणिता वृद्धिः कृता आसीत्। एतेषां क्रीडकानां कृते विमानयात्रायाः रेलयान-एसी-श्रेणी-यात्रायाश्च अपि प्रावधानं विहितम् अस्ति। मुख्यमन्त्रिणा कथितं यत् अणोः श्लैषिक-धावनमार्गस्य (सिंथेटिक ट्रैक ग्राउंड) जीर्णोद्धाराय अपि पर्याप्त-आयव्ययकस्य (बजट) प्रावधानं क्रियमाणं वर्तते। अस्मिन् अवसरे मुख्यमन्त्रिणः सान्निध्यं प्राप्य एते क्रीडकाः अतीव उत्साहिताः दृष्टाः।

# 'खेलो इण्डिया' इति राष्ट्रीयक्रीडाः हिमाचले आयोजयितुं प्रस्थापयिष्यते पक्षः- मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः:- शिमला ।अन्ताराष्ट्रिय- योगदिवसस्य उपलक्ष्ये आयुषविभागेन रविवासरे प्रातः अणोः श्लैषिक- धावनमार्गे (सिंथेटिक ट्रैक ग्राउंड) आयोजिते राज्यस्तरीयकार्यक्रमे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मुख्यातिथिरूपेण भागम् अगृह्णात्। अणोः श्लैषिक-धावनमार्गे योगाभ्याससत्रे मुख्यमन्त्रिणा सह आयुष- विधि-युवासेवा- क्रीडामन्त्री यादविन्द्रगोमा, विधायकः सुरेशकुमारः, कैप्टन रञ्जीतराणा, काङ्ग्रेस- मण्डलाध्यक्षः सुमनभारतीशर्मा, काङ्ग्रेसनेता डॉ. पुष्पेन्द्रवर्मा अन्ये च गण्याः मान्याः च अतिथयः समाविश्य प्रायः द्विसहस्रं (२०००) जनाः योगाभ्यासम् अकुर्वन्। अस्मिन् अवसरे मुख्यमन्त्रिणा दीपं प्रज्वाल्य कार्यक्रमस्य शुभारम्भः कृतः विभागस्य योग-सामयिकायाः (पत्रिकायाः) अपि विमोचनं विहितम्। योगाभ्यासानन्तरं पत्रकारैः सह सम्भाषणे मुख्यमन्त्री योगदिवसस्य सर्वेभ्यः वर्धापनानि प्रदाय अवदत् यत् योगः अस्माकं परम्परां दर्शयति स्वस्थजीवनयापनाय च प्रेरणां यच्छति।

### निम्न-हिमाचले क्रीडानां सम्बर्धनाय निरन्तरं प्रचलति कार्यम्- मुख्यमन्त्री

सः अकथयत् यत् योगः अस्माकं संस्कृतेः महती उपलब्धिः अस्ति यां अद्य सम्पूर्णं विश्वं मानयति। मुख्यमन्त्रिणा कथितं यत् निम्न-हिमाचले (निचले हिमाचल में) क्रीडानां सम्बर्धनाय सर्वकारः निरन्तरं कार्यं करोति। हमीरपुर- बिलासपुर- ऊनामण्डलेषु क्रीडासुविधाः पर्याप्ताः सन्ति, एतत् ध्यात्वा हिमाचलसर्वकारः 'खेलो इण्डिया' क्रीडाः हिमाचले आयोजयितुं स्वकीयं पक्षं (दावेदारी) प्रस्थापयिष्यति। 'मादकद्रव्यमुक्त-हिमाचल' (ड्रग फ्री हिमाचल) अभियाने सः अवदत् यत् द्वितीये चरणे सर्वकारः प्रत्येकं गृहं यावत् मादकद्रव्यसेवनस्य विरुद्धं जनान् जागरूकान् कर्तुं प्रयतते। सः अवदत् यत् योगः अस्मिन् कश्चन महत्त्वपूर्णः अंशः अस्ति, प्रत्येकं च आसनं सरलं न भवति। तेन ज्ञापितं यत् योगाभ्यासकाले तस्यापि योगकरणे काठिन्यम् अभवत्, अतः सर्वैः सम्यक्तया योगः करणीयः।

# धर्मक्षेत्रे कुरुक्षेत्रे संस्कृतभारत्याः दशदिवसीय-आवासीय-प्रबोधनवर्गस्य शुभारम्भः, १८० शिक्षार्थिनः प्रशिक्षणं गृह्णन्ति






## *हरियाणाप्रदेशे संस्कृतस्य प्रचार-प्रसारे गतिः प्राप्स्यति - कौशल किशोर तिवारी*

**हिमसंस्कृतवार्ता दीपक शर्मा।** संस्कृतभारती-हरियाणा पक्षतः 'गीता निकेतन विद्या मन्दिर, सेक्टर-३' इत्यत्र आयोजितस्य दशदिवसीय-आवासीय-संस्कृत-प्रबोधनवर्गस्य शुभारम्भः शनिवारे वैदिक-मन्त्रोच्चारणपूर्वकं, शङ्खनादेन, दीपप्रज्वलनेन च सह अभवत्। जून-मासस्य २० दिनाङ्कतः २९ दिनाङ्कपर्यन्तं प्रचल्यमाने अस्मिन् वर्गे प्रदेशस्य विविधेभ्यः जनपदेभ्यः आगताः प्रायः १८० शिक्षार्थिनः भागं गृह्णन्तिकार्यक्रमे प्रान्तीयप्रमुखः पुष्पेन्द्र आर्यः तथा तस्य सहयोगी भूपेन्द्रः अतिथीनां परिचयं स्वागतं च कृतवन्तः, यदा च प्रान्तमन्त्री प्रमोद शास्त्री वर्गस्य प्रस्तावनां प्रस्तुतवान्। मुख्यातिथिः समाजसेवी रमेश शास्त्री अवदत् यत् संस्कृतं भारतीयसंस्कृतेः आत्मा अस्ति। अस्य अध्ययनाय, संरक्षणाय, प्रचार-प्रसाराय च समाजस्य प्रत्येकवर्गः अग्रे आगच्छेत्। सः युवकान् संस्कृतस्य संरक्षणे संवर्धने च सक्रियां भूमिकां निर्वोढुं समाहूतवान्। मुख्यवक्ता संस्कृतभारत्याः सहक्षेत्रमन्त्री कौशल किशोर तिवारी अवदत् यत् संस्कृतं जनभाषां कर्तुं उद्देश्येन संस्कृतभारती १९८१ तमात् वर्षात् निरन्तरं कार्यं करोति। कौशल किशोर तिवारी अवदत् यत् संस्कृतं साधारणवर्गैः, प्रबोधनवर्गैः, प्रशिक्षणकार्यक्रमैः च माध्यमैः सरलं, सहजं, व्यावहारिकरूपेण च पाठ्यमानं अस्ति।

सः अवदत् यत् सङ्घटनस्य नवनियुक्त-प्रान्तकप्तान-पङ्गत-देवर्षि-कृष्णस्य नेतृत्वे हरियाणाप्रदेशे संस्कृतस्य प्रचार-प्रसारस्य सङ्घटनात्मककार्यस्य च नवीना गतिः प्राप्स्यति। संस्कृतं केवलं अस्माकं प्राचीना भाषा एव नास्ति, अपितु वैज्ञानिकी, समृद्धा, विश्वं योजयित्री च भाषा अस्ति। एषा गौरवस्य भागः करणीया भविष्यति। अहं समाह्वयामि यत् युवानः अग्रे आगच्छेयुः, संस्कृतं शिक्षेयुः, वदेयुः, अस्य प्रचार-प्रसारे च स्वकीयां महतीं भूमिकां निर्वहेयुः। विशिष्टातिथिः कर्नल एस.एन. शर्मा, अध्यक्षः (गीता निकेतन विद्या मन्दिर) सर्वेषाम् अतिथीनां शिक्षार्थिनां च स्वागतं कुर्वन् अवदत् यत् एतादृशाः आयोजनाः भारतीयसंस्कृतेः संस्कृतभाषायाः च संरक्षणे महतीं भूमिकां वहन्ति

संस्कृतभारती-हरियाणान्यासस्य अध्यक्षः डॉ. रामनिवास शर्मा धन्यवादप्रकटणम् अकरोत्। कार्यक्रमस्य सञ्चालनम् प्रान्तप्रशिक्षणप्रमुखः डॉ. नवीन शर्मा अकरोत्। शान्तिमन्त्रेण सह उद्घाटनसत्रं सम्पन्नम् अभवत्।

अस्मिन् अवसरे हरिदत्त शास्त्री, सुनीलः, डॉ. सुरेशः, ओमप्रकाशः, गुलशन सिंहः, डॉ. नितिनः, कपिलः, डॉ. गीता कौशिकः, पुष्कर दत्तः, जोगेन्द्र सिंहः, सुरेन्द्र तन्वरः, अजय शास्त्री, ऋषि रञ्जनः, अङ्कितः, श्रीरामः, आनन्दः, अनुष्का, आशा च सहिताः अनेके गणमान्याः महाभागाः उपस्थिताः आसन्।

# २२ जून दिनाङ्के मध्याह्नभोजन-कर्मचारिणः कार्यविरामे, सीटू-सङ्घस्य छत्रच्छायायां सचिवालयं यावत् प्रचालयिष्यन्ति प्रदर्शनम्




हिमसंस्कृतवार्ताः- शिमला।सम्पूर्णप्रदेशे 'सीटू' (CITU) सम्बद्धा 'मध्याह्नभोजन- कर्मचारिसङ्घः स्वयाचनाः अधिकृत्य २२ जून दिनाङ्के कार्यविरामस्य घोषणाम् अकरोत्। सीटू-सङ्घस्य नेतृत्त्वे कर्मचारिणः स्वकीयाः अभ्यर्थनाः पूरयितुं सचिवालयस्य बहिः प्रदर्शनमपि करिष्यन्ति। एतत् प्रदर्शनं 'टॉलैंड' स्थानात् आरप्स्यते। सर्वे कर्मचारिणः घोषवाक्यानि उद्घोषयन्तः सचिवालयं प्राप्स्यन्ति। सङ्घस्य सदस्यानाम् आरोपः अस्ति यत् न तु राज्यसर्वकारः याचनाः पूरयति, न च केन्द्रसर्वकारस्य पक्षतः कर्मचारिणां प्रति किमपि ध्यानं दीयते। आरोपः वर्तते यत् केन्द्रसर्वकारेण १७ वर्षेभ्यः कर्मचारिणाम् एकं रूप्यकमपि न वर्धितम्। अस्मात् कारणात् गृहव्ययम् अपि काठिन्येन प्रचलति। मध्याह्नभोजन- कर्मचारिसङ्घेन केन्द्रसर्वकारस्य उपरि आरोपः कृतः यत् सः बृहत्स्तरे कर्मचारिणां शोषणं करोति।

सर्वकाराः एकतः महिला-सशक्तीकरणस्य चर्चां कुर्वन्ति परन्तु ताः एव प्रपीड्यन्ते। प्रदेश- उच्चन्यायालयस्य पक्षतः दत्तं दशमासानामपेक्षया द्वादशमासानां वेतनप्रदानस्य निर्णयं सर्वकारः अद्यापि प्रवर्धितुं न शशाक। मध्याह्नभोजन- कर्मचारिभ्यः सम्पूर्णवर्षे एकमपि अवकाशः न प्रदीयते, अनेन सह एव त्रिमासं यावत् वेतनमपि न दीयते। निर्वाचनकाले मतदानदलाय (पोलिंग पार्टी) भोजननिर्माणस्य कार्यं मध्याह्नभोजन- कर्मचारिभ्यः दीयते, परन्तु तस्य प्रतिफलरूपेण तेभ्यः किमपि मानदेयं न यच्छन्ति। सेवानिवृत्तौ (रिटायरमेंट) उपदानस्य (ग्रेच्युटी) पेंशन- सुविधायाश्च अपि प्रावधानं न कृतम्। एतदतिरिच्य अपि अन्याः बह्व्यः याचनाः सन्ति। सङ्घस्य आग्रहः अस्ति यत् हरियाणासर्वकारस्य शैल्यां मध्याह्नभोजन- कर्मचारिभ्यः ७००० (सप्तसहस्र) रूप्यकाणां वेतनं दीयेत। अनेन सह एव अन्याः सर्वाः अपि याचनाः पूर्यन्ताम्। मध्याह्नभोजन- कर्मचारिसङ्घस्य प्रभारी जगतरामः अवदत् यत् सोमवासरे सङ्घस्य पक्षतः कार्यविरामः क्रियते।

# योगः मनः-बुद्धि-शरीराणां समन्वयसाधिका साधनापद्धतिः – प्रो. ललिता चन्द्रात्रे



**हिमसंस्कृतवार्ता।** प्रो. ललिता चन्द्रात्रे अवदत् यत् योगः केवलं व्यायामः नास्ति, अपितु एषः मनसि, बुद्धौ, शरीरे च समन्वयं, सन्तुलनं, समतां च स्थापयित्री साधनापद्धतिः अस्ति। योगकर्मणः निरन्तराभ्यासेन कौशलं विकसति। योगः एकः प्रभावी उपचारपद्धतिः अपि अस्ति, यस्याः उपरि लोणावला-स्थिते 'कैवल्यधाम' संस्थे विशेषानुसन्धानं क्रियमाणं वर्तते तस्य च सकारात्मकपरिणामाः सम्मुखीभूताः।

रामटेककार्यक्रमस्य सम्पूर्णनियोजनं परिसरसञ्चालकः डॉ. हरेकृष्णअगस्ती अकरोत्। सः स्वकीयसम्बोधने योगस्य प्रचारप्रसारस्य दैनिकजीवने च योगस्याङ्गीकरणस्य सन्देशं दत्तवान्। कार्यक्रमस्य आभारप्रदर्शनम् अपि तेनैव विहितम्।

### नागपुरे योगदिवसः

महिलाप्रकोष्ठ-आईसीसी-राष्ट्रीयसेवाियोजनानां संयुक्तात्त्वाधाने नागपुरशैक्षणिकपरिसरे योगदिवसः आयोजितः। संस्कृत-संस्कृतेतरभाषासङ्कायस्य अधिष्ठात्र्याः प्रो. कविताहोलेवर्यायाः प्रमुखोपस्थितौ आयोजिते अस्मिन् कार्यक्रमे सर्वे प्राध्यापकाः कर्मचारिणश्च उपस्थिताः आसन्। नागपुरपरिसर-सञ्चालिका डॉ. राजश्रीमेश्रामवर्या कार्यक्रमस्य आयोजनम् अकरोत्। भारतीयदर्शनविभागस्य प्रो. राधिकावझलवारवर्या उत्कृष्टं योगाभ्याससत्रं सञ्चालितवती। विश्वयोगदिवसः प्रत्येकं जनं स्वस्वास्थ्यं प्रति जागरूकम् अकरोत् – प्रो. कविता होले

विश्वयोगदिवसस्य अवसरे प्रो. कविता होले अवदत् यत् भारतीययोगशास्त्रं भारतस्य विश्वं प्रति दत्ता महती प्रदेया (देन) वर्तते। विश्वयोगदिवसस्य माध्यमेन योगस्य जागरूकप्रचारः सम्पूर्णे विश्वे अभवत्, यस्य श्रेयः भारतस्य प्रधानमन्त्रिणे श्रीनरेन्द्रमोदीमहोदयाय गच्छति। अद्य योगाभ्यासः प्रत्येकस्य जनस्य जीवनशैल्याः भागः सञ्जातः। योगदिवसः जनान् स्वकीयस्वास्थ्यं प्रति सजगान् कर्तुं महत्त्वपूर्णं कार्यं कृतवान्। नियमितयोगाभ्यासः चिरयौवनं, निरोगिस्वास्थ्यं, स्वस्थवृद्धावस्थां च प्रददाति। योगात् उत्पन्ना ऊर्जा, उत्साहः, सकारात्मकता च अन्यानपि योगाभ्यासाय प्रेरयेत्, एषः एव योगदिवसमाननस्य उद्देश्यः अस्ति।

विश्वयोगदिवसकार्यक्रमाय भारतीयधर्म-तत्त्वज्ञान-संस्कृति-सङ्कायस्य अधिष्ठात्री प्रो. कलापिनी अगस्ती, नागपुरपरिसरसञ्चालिका डॉ. राजश्रीमेश्रामः, राष्ट्रीयसेवाियोजनासमन्वयकः डॉ. जयवन्तचौधरी तथा च योगविभागस्य प्राध्यापकाः शोधार्थिनश्च विशेषसहयोगं प्रदत्तवन्तः।

# मानवजीवने योगस्य योगदानम् (अन्ताराष्ट्रिययोगदिवसः)

डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बराटी, भागलपुर , बिहार



योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन। योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥ भारतीयसंस्कृतेः अमूल्यक्षेत्रेषु योगः सर्वाधिकमहत्त्वपूर्णः अस्ति। योगः न केवलं शारीरिकव्यायामस्य पद्धतिः, अपितु सम्पूर्णजीवनस्य दर्शनम् अस्ति। मानवजीवनस्य सर्वेषु पक्षेषु—शारीरिके, मानसिके, बौद्धिके, नैतिके, सामाजिके तथा आध्यात्मिके—योगस्य महत्त्वपूर्णं योगदानं दृश्यते। अद्यतनयुगे यदा मानवः मानसिकवेदनया, चिन्तया, रोगैः, स्पर्धाभावेन च पीडितः अस्ति, तदा योगः तस्य जीवने शान्तेः, स्वास्थ्यस्य, सन्तुलनस्य च मार्गं प्रदर्शयति। "योग" इति शब्दः संस्कृतधातोः "युज्" इत्यस्मात् निष्पन्नः अस्ति, यस्य अर्थः संयोजनम्, एकत्वम्, समाधिः वा भवति। जीवात्मनः परमात्मना सह मेलनं, मनसः शरीरस्य च समन्वयः, चित्तस्य एकाग्रता च योगस्य प्रमुखलक्ष्यम् अस्ति। महर्षिपतञ्जलिना योगस्य परिभाषा प्रदत्ता—"योगश्चित्तवृत्तिनिरोधः।" अर्थात् चित्तस्य वृत्तीनां निरोधः एव योगः। यदा मनः स्थिरं भवति, विक्षेपाः नश्यन्ति, तदा योगस्य वास्तविकस्वरूपं दृश्यते। भगवद्गीतायामपि योगस्य विविधरूपाणि वर्णितानि सन्ति—कर्मयोगः, ज्ञानयोगः,भक्तियोगः,राजयोगःइति
एतेषां समन्वयेन मानवस्य सर्वाङ्गीणविकासः सम्भवति। योगस्य इतिहासः अतीव प्राचीनः अस्ति। वेदेषु, उपनिषत्सु, भगवद्गीतायां, महाभारते, पुराणेषु च योगस्य उल्लेखः प्राप्यते। सिन्धुघाटीसभ्यतायामपि ध्यानमुद्रायुक्तानां मूर्तीनां प्राप्तिः योगस्य प्राचीनतां सूचयति।महर्षिपतञ्जलिना योगसूत्राणि प्रणीतानि, येषु योगदर्शनस्य व्यवस्थितविवेचनं कृतम् अस्ति। तस्य अष्टाङ्गयोगः सम्पूर्णविश्वे प्रसिद्धः अस्ति।
पतञ्जलिना योगस्य अष्ट अङ्गानि निर्दिष्टानि—
यमः,नियमः,आसनम्,प्राणायामः,प्रत्याहारः
धारणा,ध्यानम्,समाधिः इति एतानि अङ्गानि मानवजीवनस्य क्रमिकविकासस्य सोपानानि भवन्ति।
यमः-यमाः सामाजिकनैतिकमूल्यानि सन्ति—
अहिंसा,सत्यं,अस्तेयम्,ब्रह्मचर्यम्,अपरिग्रहः
यमपालनेन समाजे शान्तिः सौहार्दं च वर्धते।
नियमः-नियमाः व्यक्तिगताचारस्य नियमाः सन्ति—
शौचम्,सन्तोषः,तपः,स्वाध्यायः,ईश्वरप्रणिधानम्
एते व्यक्तित्वविकासे सहायकाः भवन्ति।
आसनम्-आसनाभ्यासः शरीरं स्वस्थं, परिवर्तनीयं, सबलं च करोति। नियमितेन आसनाभ्यासेन अनेके रोगाः निवार्यन्ते।
प्राणायामः-प्राणशक्तेः नियन्त्रणं प्राणायामः इति कथ्यते। एतत् मानसिकशान्तिं, एकाग्रतां, फुफ्फुसयोः कार्यक्षमतां च वर्धयति।
प्रत्याहारः-इन्द्रियाणां विषयेभ्यः निवर्तनं प्रत्याहारः भवति । एतेन मनः अन्तर्मुखं भवति।
धारणा-चित्तस्य एकस्मिन् विषये स्थिरीकरणं धारणा कथ्यते।
ध्यानम्-धारणायाः परिपक्वावस्था ध्यानम् अस्ति। ध्यानेन मानसिकशान्तिः, आत्मविश्वासः, अन्तर्दृष्टिः च वर्धते।
समाधिः-योगस्य परमलक्ष्यं समाधिः अस्ति। अस्यां अवस्थायां साधकः परमशान्तिं आनन्दं च अनुभवति।
योगः शरीरस्य स्वास्थ्यरक्षणे अत्यन्तं उपयोगी अस्ति। नियमितयोगाभ्यासेन शरीरं स्वस्थं भवति।
रक्तसञ्चारः सम्यक् भवति। स्नायवः सुदृढाः भवन्ति। शरीरस्य पाचनक्रिया सम्यक् भवति।
निद्रा सम्यक् भवति। शरीरस्य प्रतिरक्षाशक्तिः वर्धते। अधुना मधुमेहः, उच्चरक्तचापः, स्थूलता, हृदयरोगाः इत्यादयः रोगाः विश्वे तीव्रगत्या वर्धन्ते। योगाभ्यासः एतेषां रोगाणां नियन्त्रणे महत्त्वपूर्णां भूमिकां निर्वहति।
मानसिकस्वास्थ्ये योगस्य महत्त्वपूर्णं योगदानम् अस्ति। आधुनिकजीवने मानसिकवेदना सर्वत्र दृश्यते। कार्यभारः, आर्थिकसमस्याः, सामाजिक संघर्षः, प्रतियोगिता च मनुष्यं मानसिकरूपेण क्लान्तं कुर्वन्ति।योगाभ्यासेन मानसिकवेदना न्यूना भवति।अनेन चिन्ता क्षीयते।एतेन अवसादस्य प्रभावः न्यूनः भवति। अनेन मनः प्रसन्नं भवति। अपि च आत्मविश्वासः वर्धते। अनेन भावनात्मकसन्तुलनं प्राप्यते। ध्यानं प्राणायामश्च मानसिकस्वास्थ्यस्य रक्षणे विशेषरूपेण प्रभावीनौ स्तः। योगः केवलं शरीरस्य न, अपितु बुद्धेः अपि विकासं करोति।योगाभ्यासेन स्मरणशक्तिः वर्धते,एकाग्रता दृढा भवति,निर्णयक्षमता वर्धते, सृजनात्मकशक्तिः विकसिता भवति,अध्ययनकौशलं वर्धते च।
अतः विद्यार्थिनां कृते योगाभ्यासः अतीव आवश्यकः अस्ति। योगः नैतिकमूल्यानां संवर्धनं करोति। यम-नियमादीनां पालनात् मानवः—सत्यवादी, अनुशासितः ,सहिष्णुः,दयालुः उत्तरदायी च भवति। एते गुणाः समाजस्य विकासाय अत्यावश्यकाः सन्ति। योगः मानवं समाजस्य कर्तव्यपरायणसदस्यरूपेण निर्माति। योगाभ्यासेन व्यक्तिः—सहकार्यभावं विकसितं करोति,परस्परं सम्मानं करोति,सहिष्णुतां प्राप्नोति, सामाजिकसमरसतायां योगदानं च ददाति।
योगः "वसुधैव कुटुम्बकम्" इति भारतीयदर्शनस्य भावनां सुदृढां करोति। योगस्य परमलक्ष्यम् आध्यात्मिकविकासः अस्ति। योगेन मानवः आत्मस्वरूपस्य ज्ञानं प्राप्नोति।
आध्यात्मिकक्षेत्रे योगस्य लाभाः—
आत्मचिन्तनस्य विकासः,आत्मज्ञानस्य प्राप्तिः,
अन्तःकरणस्य शुद्धिः,ईश्वरभक्तौ वृद्धिः
मोक्षमार्गस्य अनुकूलता च। योगाभ्यासेन जीवः आत्मानं परमात्मानं च अनुभवन्ति।
विद्यार्थिनां कृते योगः अत्यन्तं लाभदायकः अस्ति। योगेन अध्ययनरुचिः वर्धते,मरणशक्तिः तीव्रा भवति, परीक्षाभयं न्यूनं भवति,आत्मविश्वासः वर्धते ,अनुशासनभावना च विकसिता भवति ।
अतः विद्यालयेषु योगशिक्षणस्य व्यवस्था अनिवार्या भवेत्। कार्यालयेषु कार्यरताः जनाः बहुधा कार्यभारैः ग्रस्ताः भवन्ति।योगाभ्यासेन तेषां कार्यक्षमता वर्धते। अतः बहूनि संस्थानानि योगकार्यक्रमान् आयोजयन्ति। योगः महिलानां स्वास्थ्यरक्षणे महत्त्वपूर्णः अस्ति।
योगाभ्यासेन शारीरिकबलं वर्धते,मानसिकशान्तिः लभ्यते,"हार्मोन"इत्यादीनां सन्तुलनं भवति,
गर्भावस्थायां लाभः भवति आत्मविश्वासः च वर्धते। वृद्धावस्थायां योगः स्वास्थ्यसंरक्षणस्य श्रेष्ठः उपायः अस्ति। योगेन सन्धिवेदना न्यूना भवति,शारीरिकगतिशीलता वर्धते,मानसिकप्रसन्नता वर्धते, एकाकित्वभावः क्षीयते च। अद्य योगः सम्पूर्णविश्वे लोकप्रियः जातः। संयुक्तराष्ट्रसङ्घेन जूनमासस्य एकविंशतितिदिनांकः
"अन्तर्राष्ट्रीययोगदिवसः" इति नाम्ना घोषितः। विश्वस्य अनेकेषु देशेषु कोटिशः जनाः प्रतिदिनं योगाभ्यासं कुर्वन्ति। एतत् भारतीयसंस्कृतेः वैश्विकस्वीकृतिं प्रदर्शयति।

## योगः प्रकृतिं प्रति सम्मानभावं शिक्षयति।

योगाभ्यासेन मानवः पर्यावरणसंरक्षणस्य महत्त्वं जानाति, प्राकृतिकजीवनशैलीं स्वीकरोति,
सन्तुलितोपभोगस्य मार्गं अनुसरति च।
अतः योगः पर्यावरणसंरक्षणे अपि सहायकः अस्ति। सारांशतः वयं वक्तुं शक्नुमो यत् योगः मानवजीवनस्य सर्वाङ्गीणविकासस्य आधारः अस्ति। सः शरीरं स्वस्थं करोति, मनः शान्तं करोति, बुद्धिं तीक्ष्णां करोति, चरित्रं निर्मलं करोति, समाजे समरसतां वर्धयति, आत्मज्ञानस्य मार्गं प्रशस्तं करोति च। अद्यतनयुगे यदा मानवः विविधसमस्याभिः परिवृतः अस्ति, तदा योगः तस्य कृते अमूल्यं वरदानम् अस्ति। अतः प्रत्येकं मानवे योगस्य समावेशः स्वजीवने कुर्यात्। योगस्य नियमिताभ्यासेन मानवः स्वस्थः, सुखी, समृद्धः, सन्तुलितः च समाजः निर्मातुं शक्यते।
"योगः कर्मसु कौशलम्।""समत्वं योग उच्यते।"
एते भगवद्गीतायाः वचने योगस्य वास्तविकमहत्त्वं प्रतिपादयतः। अतः योगः न केवलं व्यायामः, अपितु सफलजीवनस्य आधारशिला अपि अस्ति। अस्मिन् वर्षे योगदिवसस्य चिन्तनम् अस्ति स्वस्थवृद्धावस्थायै योगःइति ॥ सर्वेषां कृते अन्ताराष्ट्रिययोगदिवसस्य हार्दिक्यः शुभकामना।। इत्यलम्।

# अन्तरराष्ट्रीय-योग-दिवसस्य अवसरे देशव्यापिनः अनेकेषां योगकार्यक्रमाणाम् आयोजनं कृतम्।



तमिलनाडुराज्यस्य कोयम्बटूरनगरे स्थिते आदियोगी-परिसरे केन्द्रीय-आरक्षित-आरक्षक-बलस्य (CRPF) सैनिकानां कृते विशेषयोगसत्राणां आयोजनम् अभवत्। बेङ्गलूरुनगरे स्थिते सद्गुरु-सन्निधौ राष्ट्रिय-कैडेट-कोर (NCC) इति सङ्घटनस्य छात्रसैनिकैः (कैडेट्स) सीमा-सुरक्षा-बलस्य (BSF) सैनिकैश्च योगकार्यक्रमेषु भागः गृहीतः।ईशा-फाउन्डेशनेन देशे प्रायः एकसहस्रं (१०००) निःशुल्काणां योग-ध्यान-सत्राणाम् आयोजनं विहितम्। एतेषु कार्यक्रमेषु पञ्चाशत्सहस्राधिकैः (५०,०००+) जनैः सहभागिता कृता।अस्मिन् अवसरे ईशा-फाउन्डेशस्य संस्थापकेन सद्गुरु-जग्गी-वासुदेवेन उक्तं यत्- "योगे प्रत्येकस्य मनुष्यस्य अन्तः निहितां प्रतिभां क्षमतां च जागरयितुं अपारा शक्तिः वर्तते।"

# भारतं जून-मासस्य २५-२६ दिनाङ्कयोः हरियाणा-राज्ये ११ तम्याः (एकादशतम्याः) ब्रिक्स-ऊर्जामन्त्रिणां संगोष्ठ्या अध्यक्षतां करिष्यति

भारतं जून-मासस्य २५-२६ दिनाङ्कयोः हरियाणा-राज्यस्य गुरुग्रामनगरे ११ तमीं (एकादशतमीं) ब्रिक्स-ऊर्जामन्त्रिणां बैठकस्य (उपवेशनस्य) अध्यक्षतां करिष्यति। उपवेशने ब्रिक्स-सङ्घटनस्य सर्वेषां ११ (एकादश) सदस्यदेशानां ऊर्जामन्त्रिणः वरिष्ठाधिकारिणश्च भागं ग्रहीष्यन्ति।

# महर्षि-महेश-योगी-वैदिकविश्वविद्यालये द्वादशतम-अन्तर्राष्ट्रीय-योग-दिवसस्य भव्यः कार्यक्रमः सुसम्पन्नः

**हिमसंस्कृतवार्ता - डॉ आलोकः कटनी।** महर्षि-महेश-योगी-वैदिकविश्वविद्यालयः महर्षि-वेद-विज्ञान-विद्यापीठम् इत्यनयोः संयुक्ततत्त्वावधाने द्वादशतमान्ताराष्ट्रिय-योग-दिवसस्य शुभावसरे विश्वविद्यालयस्य कुलाधिपतिः ब्रह्मचारी डॉ.गिरीशचन्द्रवर्ममहोदयस्य संरक्षणेझ कुलगुरोः प्रो.(डॉ.) नरेशकुमारतिवारीमहोदयस्य च मार्गदर्शने दिनाङ्के 21 जून 2026 प्रातः 8:00 वादने बृहद्ध्यानमण्डपे भव्यः गरिमामयश्च कार्यक्रमः सुसम्पन्नः। अस्य कार्यक्रमस्य अध्यक्षता कुलगुरुणा प्रो.(डॉ.) नरेशकुमारतिवारीमहोदयेन कृता। मुख्यतिथिरूपेण बड़वाराक्षेत्रस्य विधायकः श्रीधीरेन्द्रबहादुरसिंहमहोदयः समुपस्थितः आसीत्। विशिष्टातिथिषु श्रीपद्मेशगौतममहोदयः (सांसद-प्रतिनिधिः), श्रीमती सुनीतासन्तोषदुबेमहोदया (जनपद-पञ्चायत-अध्यक्षा, ढीमरखेड़ा), श्रीराजेशव्योहारमहोदयः, श्रीसन्तोषदुबेवर्यः, श्रीअरविन्दसिंहमहोदयः (महर्षिवेदविज्ञानविद्यापीठस्य प्रभारी), श्रीआशीषचौरसियामहोदयः (मण्डलाध्यक्षः) तथा अन्ये बहवः गणमान्यजनाः समुपस्थिता आसन्। अस्मिन् अवसरे विश्वविद्यालयविद्यापीठयोः अधिकारीणः, आचार्याः, कर्मचारीगणः, छात्राश्च उत्साहपूर्वकं सहभागं कृतवन्तः।
कार्यक्रमस्य शुभारम्भः गुरुपूजनं वैदिकमन्त्रपाठं च कृत्वा अभवत्। ततः सर्वे अतिथयः, छात्राः, नागरिकाश्च सामूहिकरूपेण योगाभ्यासं भावातीतध्यानस्य (Transcendental Meditation) अभ्यासं च अकुर्वन्। विश्वविद्यालयस्य योगविभागाध्यक्षः कार्यक्रमसंयोजकश्च डॉ.नित्येश्वरचतुर्वेदीमहोदयः,विद्यापीठस्य ध्यानशिक्षकः श्रीसुशीलमिश्रमहोदयः च आयुष-मन्त्रालयस्य प्रोटोकॉल-अनुसारेण विविधयोगासनानि, प्राणायामान् तथा भावातीतध्यानस्य प्रक्रियाः अभ्यासितवन्तौ। सम्पूर्णे वातावरणे स्वास्थ्यस्य, शान्तेः, आध्यात्मिकचेतनायाश्च भावना दरीदृश्यते स्म।
स्वीये अध्यक्षीयोद्बोधने प्रो.(डॉ.)नरेशकुमारतिवारीमहोदयः उक्तवान् यत् योगः भारतस्य सनातनज्ञानपरम्परायाः अमूल्या धरोहरः अस्ति। सः शारीरिक-मानसिक-आध्यात्मिक-विकासस्य प्रमुखः आधारः अस्ति। अद्यतनस्य अवसादपूर्णस्य प्रतिस्पर्धात्मकस्य च युगस्य सन्दर्भे योगः तथा भावातीतध्यानं मानवजीवने सन्तुलनं, शान्तिं, सृजनशीलतां सकारात्मकशक्तिं च जनयतः। तेन उक्तं यत् महर्षिमहेशयोगिना विश्वप्रदत्तं भावातीतध्यानज्ञानं मानवजीवनस्य उन्नतये वैज्ञानिकं प्रभावी च साधनम् अस्ति। तेन सर्वेभ्यः नागरिकेभ्यः युवकेभ्यश्च योगं नित्यजीवनस्य अभिन्नाङ्गरूपेण स्वीकर्तुम् आह्वानं कृतम्।
मुख्यतिथिः विधायकः श्रीधीरेन्द्रबहादुरसिंहमहोदयः स्वीये भाषणे अवदत् यत् भारतस्य माननीयप्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य प्रयत्नैः अद्य अन्ताराष्ट्रिय-योग-दिवसः वैश्विकजनान्दोलनस्य रूपं प्राप्तवान् अस्ति। तेन युवजनान् भारतीयसंस्कृतेः, योगस्य, आध्यात्मिकमूल्यानां च अनुसरणेन राष्ट्रनिर्माणे सक्रियभूमिकां निर्वोढुम् आहूतम्। कार्यक्रमे उपस्थितैः अन्यैः अतिथिभिः अपि स्वविचाराः प्रस्तुताः। तैः योगः ध्यानं च स्वस्थसमाजस्य, सशक्तराष्ट्रस्य, विश्वशान्तेः च महत्त्वपूर्णं साधनम् इति प्रतिपादितम्। सर्वैः वक्तृभिः योगस्य जन-जनपर्यन्तं प्रसारणस्य आवश्यकता प्रतिपादिता। तदनन्तरं ज्योतिषविभागाध्यक्षः कार्यक्रमसमन्वयकश्च प्रो.मानवेन्द्रपाण्डेयमहोदयः धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य संयोजकः योगविभागाध्यक्षः डॉ.नित्येश्वरचतुर्वेदीमहोदयः आसीत्। सहसंयोजकौ डॉ.आलोकचन्द्रपरिडामहोदयः (सहायक-प्राध्यापकः एवं वेदविभागाध्यक्षः) , डॉ.श्यामबाबूखरेमहोदयः (सह-प्राध्यापकः) आस्ताम्। योगदिवसस्य आयोजनस्य पूर्वम् आयुषमन्त्रालयेन निर्दिष्टस्य “स्वस्थ-सक्रियवृद्धावस्थायै योगः” इति विषयस्य आधारेण विश्वविद्यालयस्य कुलसचिवस्य श्रीसन्दीपशर्मामहोदयस्य मार्गदर्शने योगविभागाध्यक्षः डॉ.-नित्येश्वर-चतुर्वेदी-महोदयः, ध्यान-सिद्धि-शिक्षकः श्रीगिरिजाशङ्करचौधरीमहोदयः तथा योगविभागस्य सहायकप्राध्यापकः श्रीदीपकपाण्डेयमहोदयः च संयुक्तरूपेण दिनाङ्कात् 14 जूनतः 18 जून 2026 पर्यन्तं प्रातः 06:00–07:00 वादनपर्यन्तं पान-उमरिया इति स्थाने पञ्चदिवसीयं योग-प्रशिक्षण-शिविरम् आयोजितवन्तः। पुनः दिनाङ्कात् 18 जूनतः 20 जून 2026 पर्यन्तं सायं 06:00–07:00 वादनपर्यन्तं महर्षि-वेद-विज्ञान-विद्यापीठे त्रिदिवसीयं योग-प्रशिक्षण-शिविरम् अपि सञ्चालितवन्तः, यत्र अनेकाः जनाः योग-प्रशिक्षणं प्राप्तवन्तः। अन्ते राष्ट्रगानस्य गायनेन कार्यक्रमस्य सफलतापूर्वकं समापनम् अभवत् इति शम्।

# योगविषये किञ्चिच्चिन्तनम्



पातञ्जलयोगदर्शनस्य साधनपादे अन्तःकरणस्य शुद्ध्यर्थं केचनोपायाः सूत्रमाध्यमेन उल्लिखिताः सन्ति।

**१) तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।**
अर्थात् तपश्चर्या, स्वाध्यायः, ईश्वरशरणागतिः चेति त्रिप्रकारकः क्रियायोगः कथ्यते।

**२)समाधिभावनार्थः क्लेशतनूकरणार्थश्च।**
क्रियायोगोऽयं समाधेः सिद्ध्यर्थं, तथा अविद्यादिक्लेशानां क्षीणीकरणार्थं युज्यते।

**३) अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः।**
अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशः चेति पञ्च क्लेशाः कथ्यन्ते। एते जीवाय प्रपञ्चे भ्रामयित्वा, महादुःखं प्रददाति, तस्मात् क्लेशाः प्रोक्ताः।

**४) अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्।**
अविद्यानामकः क्लेशः प्रसुप्तः, तनुः, विच्छिन्नः, उदारः चेति चतुरवस्थायां वर्तमाने तिष्ठति, एतेषां वर्णनम् उत्तरसूत्रे प्रदत्तमस्ति। तेषाम् अस्मितादिक्लेशानां चतुर्णामेव कारणम् अविद्या वर्तते।

**५)अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या।**
अनित्यम्, अपवित्रं, दुःखम्, अनात्मा इत्यादिषु वस्तुषु नित्यं, पवित्रं, सुखम्, आत्मभावः इत्यादीनाम् अनुभूतिः हि अविद्या नाम।

**६) दृग्दर्शनशक्त्योरेकात्मतेवास्मिता।**
दृक्-शक्तिः, दर्शनशक्तिः चानयोः एकात्मता, समानता वा हि अस्मिता नामधेया।

**७) सुखानुशयी रागः।**
सुखप्रतीतेः अनुकर्ता हि रागः कथ्यते।

**८) दुःखानुशयी द्वेषः।**
एवं दुःखप्रतीतेः अनुकर्ता च द्वेषः नामधेयः क्लेशः वर्तते।

**९) स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः।**
यः परम्परागतेन स्वभावेन प्रवर्तमानः स्यात्, एवं यस्मात् विद्वान् अपि मूढवत् आचरति, अर्थात् विवेकशीलपुरुषेषु अपि यः विद्यमानः स्यात्, सः मरणादिभयरूपः क्लेशः अभिनिवेशः कथ्यते इति, शम्। (क्रमशः)



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# विनोदकणिका"

वित्तकोषग्राहकः- यदि अहं अद्य धनादेशः वित्तकोषे संग्रहामि तर्हि कदा पारिता भविष्यति?
वित्तकोषलिपिकः- दिनत्रयानन्तरम्।
ग्राहकः- किन्तु मम धनादेशः तु पुरतः वित्तकोषस्य एवास्ति। उभौ वित्तकोषौ सम्मुखौ स्तः। तर्हि एतावत् विलम्बं किमर्थम्? 🤔
लिपिकः- कार्यप्रणाली आवश्यकी। चिन्तयतु कुत्र गच्छन् समये यदि त्वं अकस्मात् शमशानात् बहिः मृतः तर्हि भवन्तं प्रथमं गृहं नेष्यति वा? अथवा तत्रैव शमशाने नीत्वा दहनक्रियां करिष्यति? 😅
ग्राहकः अचेतनः अभवत्। 😎 🙆 😄

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका अतीव विचित्रा वार्ता श्रुता। चीनदेशे एकेन द्वादशवर्षीयेन बालकेन प्रतिवेशिनः यानस्य कुञ्चिकाः चोरिताः। तेन षड् होराः यावत् यानं चालितम्। यदा आरक्षकाः तं गृहीतवन्तः सन्ति, तदा तेन कथितम् यत् "अहं वामनत्व-युक्तः वयस्कः अस्मि" इति।
**नन्दिनी-** अहो आश्चर्यम्! द्वादशवर्षीयस्य बालकस्य यानचालनं तस्य वामनत्वस्य व्याजः च अतीव हास्यकरः। इतः परं द्वितीया वार्ता दक्षिण-कोरिया-देशात् अस्ति, या अतीव भयङ्करी विचित्रा च अस्ति। तत्र एकस्मिन् पुनरावर्तन-केन्द्रे कर्मकरैः एकः छिन्नः मानुषपादः दृष्टः। आरक्षकाः सुदीर्घम् अन्वेषणं कृतवन्तः सन्ति। अन्ते ज्ञातं यत् कस्याश्चित् रुग्णायाः पादः शल्यचिकित्सया कर्तितः, एकः सेवकः च तं कृत्रिम-पादं मत्वा अवकर-स्यूते क्षिप्तवान् अस्ति।
**काव्या-** एषा तु चिकित्सालयस्य महती असावधानता अस्ति। छिन्नः पादः अवकरे प्रक्षिप्तः इति अतीव बीभत्सम्। इदानीं कोलोराडो-प्रदेशात् तृतीया वार्ता श्रूयताम्। तत्र एकेन भल्लूकेन कस्यचित् गृहस्य यानशालायाः अवकर-स्यूतः अपहृतः। गृहस्वामिना गृहाभ्यन्तरे स्थित्वा शान्तभावेन तस्य भल्लूकस्य इयं चौर्यक्रिया दृष्टा। वनविभागाधिकारिभिः जनाः सावधानाः भवितुम् उक्ताः।
**नन्दिनी-** सत्यम्, सः भल्लूकः तु अतीव चतुरः चोरः। गृहस्वामी अपि बुद्धिमान् यत् तेन विरोधः न कृतः। चतुर्थी वार्ता अपि कोलोराडो-प्रदेशात् एव अस्ति, यत्र 'हावर्ड'-नामा कश्चन विशालः कूर्मः चोरेण अपहृतः। सः कूर्मः तस्य आपणस्य मुख्यचिह्नम् अस्ति। आरक्षकाः चोरम् एकस्मिन् विश्रामगृहे अन्विष्टवन्तः सन्ति, सः कूर्मः च आरक्षकैः रक्षितः तस्य स्वामिने प्रत्यर्पितः च।
**काव्या-** अहो, हावर्ड-कूर्मस्य रक्षा जाता इति अतीव हर्षस्य विषयः! एताः अद्यतन्यः अतीव विचित्राः वार्ताः सन्ति। नन्दिनि, अद्यतन-वार्ता- कार्यक्रमाय धन्यवादः। पुनर्मेलिष्यामः।

# नाभानगरे विद्याभारत्याः दयानन्दपब्लिकविद्यालये जातः संस्कृतभारत्याः सम्पूर्तिकार्यक्रमः





**नाभा (पटियाला)** संस्कृतभारत्याः उत्तरक्षेत्रप्रशिक्षणवर्गः २०२६ पञ्जाबप्रदेशस्य पटियालाजनपदस्य नाभानगरे जूममासस्य ऊनविंशतिः दिनाङ्के सम्पन्नः। द्वादशदिनात्मके शिक्षकप्रशिक्षणशिविरेस्मिन् पञ्जाब-हरियाणा-हमिचल-जम्मूकाश्मीर-देहलीप्रान्तेभ्यः उपद्विंशतम् अध्येतारः अध्यापकाश्च समागता आसन्। अस्य समापनकार्यक्रमे पञ्जाबप्रदेशस्य महामहिमा राज्यपालमहोदयः श्रीगुलाबचन्दकटारिया महाभागः मुख्यातिथि-रूपेण समागतः। कार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन सरस्वतीप्रार्थनया च जातः। तत्पश्चात् दयानन्दपाण्डुसरनाभा-इत्यस्य विद्यालयस्य छात्रैः वन्देमातरम् इति राष्ट्रीयगीतस्य प्रस्तुतिः कृता। अध्येतृगणैः अतिथिस्वागतगीतेन च अतिथीनां स्वागतं विहितम्, संस्कृतसम्भाषणकौशलदर्शयितुं लघुनाटकस्य, बिन्दुपाठनस्य च प्रदर्शनं कृतम्। कार्यक्रमस्य मुख्यवक्तुरछपेण समागतेन अखिभारतीयसंघटनमन्त्रिणा श्रीमता जयप्रकाशगौतमेन उक्तं यत् संस्कृतभात्याः आरम्भः १९८२ तमें ख्रीस्ताब्दे जातः आसीत् ततः अधुनापर्यन्तं एतस्य संस्कृतसंघटनस्य प्रसारः जायमानः अस्ति। वर्तमानकाले संस्कृतभारत्याः कार्यं भारते चत्वारिंशत् (४०) प्रान्तेषु द्वादशक्षेत्रेषु (१२) तथा च विश्वे अष्टाविंशतिः देशेषु प्रसृतम् अस्ति। तेन उत्तरक्षेत्रस्य नवीनानां दायित्वानां घोषणा कुर्वन् श्रीमान् संजीवः श्रीवास्तवः उत्तरक्षेत्रस्य बालकेन्द्रप्रमुखत्वेन, श्रीमान् अजयःआर्यः प्रान्तमन्त्रित्वेन, श्रीमान् देवांशकृष्णः प्रान्तसङ्गटनमन्त्रिहरियाणारूपेण नियोजितः। श्रीदेवेन्द्रकुमारेण गगनदीपपाठकेन च श्रीरामविग्रहेण मुख्यवक्तुः सम्मानः विहितः। महामहिम्ना राज्यपालेन उक्तं यत् संस्कृतं भारतदेशस्य आत्मा अस्ति। वयं संस्कृतं विना भारतस्य ज्ञानं मूल्यानि च अवगन्तुं न शक्नुमः। एषा भाषा न केवलं रामायणमहाभारतयोः भाषा अपितु चरकसुश्रुतयोः , ज्ञानविज्ञानयोः, गणितखगोलयोश्च भाषा अस्ति। पंजाबराज्ये संस्कृतस्य प्रचारप्रसाराय यत् किमपि अपेक्षितं अस्ति वयं कर्तुं प्रयतामहे।

### राज्यपालस्य सम्मानः दयानन्दपाण्डुसरस्य अध्यक्षेन प्रान्तमन्त्रिणा श्री अजयकुमार-आर्येण च कृतः

आगतानाम् अतिथीनां सामाजिकानां धन्यवादज्ञापनं संस्कृतभारत्याः अध्यक्षेन श्री वीरेन्द्रकुमारेण विहितम्।

अस्मिन्नवसरे संस्कृतभारत्याः वरिष्ठाः अधिकारिणः श्रीमान् विनायकहेगडेवर्यः, श्रीकौशलकिशोरः, उत्तरक्षेत्रसंघटनमंत्री श्री नरेन्द्रकुमारः, हरियाणा-देहली-जम्मूप्रान्तानां संघटनमन्त्रिणः, दयानन्दपब्लिकविद्यालयस्य प्राचार्यः, प्रान्तप्रचारप्रमुखः डॉ ओमनदीपः , प्रान्तशिक्षणप्रमुखः नीरजकुमारः, पटियालाविभागसंयोजकः श्रीगगनदीपपाठकः तथा नाभापटियालाभादसोंखन्नानगराणां विविधेभ्यः सामाजिक-राजनैतिक-धार्मिकसंघटनानां प्रतिनिधयः समुपस्थिताः आसन्।

# द्वादशतमः अन्ताराष्ट्रिय-योगदिवसः सम्यक् आचरितः




**हिमसंस्कृतवार्ताः- डॉ. विमलेशझा, भागलपुर, बिहार**

बिहारराज्यस्य भागलपुरबरारीक्षेत्रस्य डीएवी पब्लिक-विद्यालयस्य विशालक्रीडाङ्गणे द्वादशः अन्ताराष्ट्रियोगदिवसः उत्साहेन समाचरितः। अस्मिन् अवसरे विशेषयोगाभ्यासकार्यक्रमस्य आयोजनम् अभवत्। कार्यक्रमे विद्यालयस्य शिक्षकः नवेशभारतीमहोदयः योगस्य लाभान् प्रतिपाद्य विविधासनानां प्राणायामानां च अभ्यासं कारितवान्। तेन वृक्षासनम्, त्रिकोणासनम्, सूर्यनमस्कारः, ताडासनम्, भुजङ्गासनम्, मकरासनम्, उत्तानपादासनम्, सेतुबन्धासनम्, शीर्षसनम् इत्यादीनाम् आसनानाम् अभ्यासः कारितः। अपि च तेन अनुलोमविलोमः, कपालभाति, भस्त्रिका, भ्रामरी, उद्गीथइत्यादीनां प्राणायामानामपि अभ्यासः अपि कारितः। अस्मिन् शुभावसरे विद्यालयस्य प्राचार्यः सह सहायक-क्षेत्रीयाधिकारी अनिलकुमारमहोदयः योगः कर्मसु कौशलम्, इत्यनेन योगस्य महत्त्वं प्रतिपादयन् "योगः वर्तमानजीवनशैल्याः कृते अत्यन्तं प्रासङ्गिकः" इति अवदत्। तेन उक्तम् यत् योगः अस्माकं प्राचीनभारतीयसंस्कृतेः अभिन्नम् अङ्गम् अस्ति। शारीरिक-मानसिक-आध्यात्मिकविकासाय अस्माभिः दैनिकजीवने योगस्य अवलम्बनं कर्तव्यम्। अद्य सम्पूर्णं विश्वं योगकारणेन भारतदेशं प्रति आदरभावेन पश्यति। अतः सर्वैः प्रतिदिनं योगाभ्यासः करणीयः। अस्मिन् कार्यक्रमे एनसीसीइत्यस्य छात्राः अन्ये विद्यार्थिनः च सक्रियतया भागं गृहीतवन्तः। कार्यक्रमस्य सफल- संचालने निरेन्द्रप्रकाशसिंहः, प्रमोदकुमारमण्डलः, लवलीकुमारी, देवाशीषभारती, अभिनवकुमारः, सुजीतकुमारमण्डलः, डॉ. चन्द्रहास भारती, डॉ. घनश्याम पाठकः, मनीष कुमारः, वसुंधरा कुमारी, निशि भारती, स्वीटी दत्ता, गवेन्द्रनारायण सिंह इत्यादीनां समस्तशिक्षकशिक्षिकानां, शिक्षकेतरकर्मचारिणां च प्रशंसनीयं योगदानम् अभवत्।

# नामधातु-परिचयः -०५

"काम्यच्" इति पा०सूत्रानुसारम् आत्मेच्छायां सुबन्तकर्मणः काम्यच् भवति। यथा -

वस्त्रम् आत्मन इच्छति - वस्त्रकाम्यति।

बालः वस्त्रकाम्यति।

रमेशः आत्मनः पुत्रम् इच्छति - रमेशः पुत्रकाम्यति। 'पुत्रकाम्य' इति नामधातुः।

एवम्, किम् इच्छति - किङ्काम्यति ?

इदम् इच्छति - इदंकाम्यति। यशः इच्छति - यशःकाम्यति। धनम् इच्छति - धनकाम्यति। सर्पिः इच्छति - सर्पिष्काम्यति।

**क्यङ्-प्रत्ययः** कर्तृवाचकात् सुबन्तात् क्यङ्-प्रत्ययो भवति। धातुभ्यः आत्मनेपदं भवति। यथा -

श्येन इव आचरति काकः - काकः श्येनायते। कृष्ण इव आचरति बालः - बालः कृष्णायते। अ/आ/इ/ई/उ/ऊ-काराः दीर्घाः भवन्ति। यथा - नामधातुरूपम्/लटि च क्रमेण - श्येनाय/श्येनायते। कृष्णाय/कृष्णायते। पुष्कराय/पुष्करायते।

अवगल्भाय/अवगल्भायते। होडाय/होडायते। क्लीबाय/क्लीबायते। अर्थात्, राकेशः क्लीब इव आचरति - राकेशः क्लीबायते। प्रातिपदिकान्तस्य न/स-कारयोः लोपो भवति, यथा - राजाय/राजायते। करीय/करीयते। अप्सराय/अप्सरायते। ओजाय/ओजायते। एवं पयायते, पयस्यते। यशायते, यशस्यते। विद्वायते, विद्वस्यते वा। रामः त्वम् इव आचरति - रामः त्वद्यते। केशवः अहम् इव आचरति - केशवः मद्यते। बहुवचने अस्मद्/युष्मदयोः तन्न सम्भवति। स्त्रीप्रत्ययान्तेभ्यः क्यङ्-प्रत्ययस्य किञ्चिदुदाहरणम् ---

कुमारी इव आचरति - कुमारायते। अत्र 'कुमाराय' इति नामधातुः।

युवती इव आचरति - युवायते।

'युवाय' इत्यत्र नाम धातुः।

एवमेव, हंसायते। सपत्नायते/सपतीयते। हरितायते/ हरिणायते।

एषा गुर्वी इव आचरति - एषा गुरूयते। एवञ्च, पाचिकायते। पाठिकायते। कारिकायते। गायिकायते। मद्रिकायते, इत्यादि। (क्रमशः) **नारदोपाध्यायः**




### दृढसुरक्षाप्रबन्धेन सह नीट-यूजी (NEET-UG) २०२६ इत्यस्य पुनर्परीक्षा सम्पन्ना

नीट-यूजी २०२६ इत्यस्य पुनर्परीक्षा अद्य सुदृढ-सुरक्षाव्यवस्थया सह आयोजिता अभवत्। एषा परीक्षा देशस्य ५५१ नगरेषु तथा च विदेशस्य १४ नगरेषु आयोजिता जाता। अस्याम् परीक्षायाम् द्वाविंशतिलक्ष-नवसप्ततिसहस्रेभ्यः (२२,७९,०००) अधिकाः परीक्षार्थिनः भागं गृहीतवन्तः। सुरक्षाव्यवस्था चः परीक्षायाः कृते बहुस्तरीया सुरक्षाव्यवस्था कृता आसीत्। अस्याम् सी.सी.टी.वी. (CCTV) निरीक्षणम्, आधार-आधारितं बायोमेट्रिक-सत्यापनम्, तथा च प्रश्नपत्राणां सुरक्षित-परिवहनाय जी.पी.एस. (GPS) युक्त-वाहनैः सह आरक्षक-बलस्य (पुलिस) व्यवस्था सम्मिलिता आसीत्।